श्री सुपर्ण स्तोत्रं (महाभारते)

श्री सुपर्ण स्तोत्रं (महाभारते)

देवा ऊचुः |
त्वमृषिस्त्वं महाभागस्त्वं देवः पतगेश्वरः |
त्वं प्रभुस्तपनः सूर्यः परमेष्ठी प्रजापतिः || 1 ||

त्वमिंद्रस्त्वं हयमुखस्त्वं शर्वस्त्वं जगत्पतिः |
त्वं मुखं पद्मजो विप्रस्त्वमग्निः पवनस्तथा || 2 ||

त्वं हि धाता विधाता च त्वं विष्णुः सुरसत्तमः |
त्वं महानभिभूः शश्वदमृतं त्वं महद्यशः |
त्वं प्रभास्त्वमभिप्रेतं त्वं नस्त्राणमनुत्तमं || 3 ||

बलोर्मिमान् साधुरदीनसत्त्वः
समृद्धिमान् दुर्विषहस्त्वमेव |
त्वत्तः सृतं सर्वमहीनकीर्ते
ह्यनागतं चोपगतं च सर्वं || 4 ||

त्वमुत्तमः सर्वमिदं चराचरं
गभस्तिभिर्भानुरिवावभाससे |
समाक्षिपन् भानुमतः प्रभां मुहु-
-स्त्वमंतकः सर्वमिदं ध्रुवाध्रुवं || 5 ||

दिवाकरः परिकुपितो यथा दहेत्
प्रजास्तथा दहसि हुताशनप्रभ |
भयंकरः प्रलय इवाग्निरुत्थितो
विनाशयन् युगपरिवर्तनांतकृत् || 6 ||

खगेश्वरं शरणमुपागता वयं
महौजसं ज्वलनसमानवर्चसं |
तडित्प्रभं वितिमिरमभ्रगोचरं
महाबलं गरुडमुप्येत खेचरं || 7 ||

परावरं वरदमजय्यविक्रमं
तवौजसा सर्वमिदं प्रतापितं |
जगत्प्रभो तप्तसुवर्णवर्चसा
त्वं पाहि सर्वांश्च सुरान् महात्मनः || 8 ||

भयान्विता नभसि विमानगामिनो
विमानिता विपथगतिं प्रयांति ते |
ऋषेः सुतस्त्वमसि दयावतः प्रभो
महात्मनः खगवर कश्यपस्य ह || 9 ||

स मा क्रुधः कुरु जगतो दयां परां
त्वमीश्वरः प्रशममुपैहि पाहि नः |
महाशनिस्फुरितसमस्वनेन ते
दिशोऽंबरं त्रिदिवमियं च मेदिनी || 10 ||

चलंति नः खग हृदयानि चानिशं
निगृह्यतां वपुरिदमग्निसन्निभं |
तव द्युतिं कुपितकृतांतसन्निभां
निशम्य नश्चलति मनोऽव्यवस्थितं |
प्रसीद नः पतगपते प्रयाचतां
शिवश्च नो भव भगवन् सुखावहः || 11 ||

एवं स्तुतः सुपर्णस्तु देवैः सर्षिगणैस्तदा |
तेजसः प्रतिसंहारमात्मनः स चकार ह || 12 ||

इति श्रीमन्महाभारते आदिपर्वणि त्रयोविंशोऽध्याये देवकृत श्री सुपर्ण स्तोत्रं ||